गोलिहः, पुं, (गाः लेढीव इति । लिह + कः । गोभि-र्लिह्यते इति घञर्थे क इति केचित् ।) घण्टा पाटलिः । इति जटाधरः ॥

गोलीढ़ः, पुं, (गोभिर्लिह्यते स्म इति क्तः ।) घण्टापाटलिः । इत्यमरः । २ । ४ । ३६ ॥

गोलोकं, क्ली, (गौर्ज्योतीरूपं ज्योतिर्म्मयः पुरुष इत्यर्थस्तस्य लोकः स्थानम् । अभिधानात् क्लीवत्वम् । यद्वा गोभिः किरणैः ब्रह्मज्ञानतेजोभिरित्यर्थः लोक्यते इति । लुक् + घञ् ।) श्रीकृष्णस्य स्थानम् । यथा, तन्त्रे ।

"वैकुण्ठस्य दक्षभागे गोलोकं सर्व्वमोहनम् ।
तत्रैव राधिका देवी द्विभुजो मुरलीधरः ॥
यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके ।
ध्याने वा चक्षुषोः किं वा ध्यानयोगे न विद्यते ॥
शुद्धतत्त्वमयं देवि ! नानादेवेन शोभितम् ।
मध्यदेशे गोलोकाख्यं श्रीविष्णोर्लाभमन्दिरम् ॥
श्रीविष्णोः सत्त्वरूपस्य यत् स्थलं चित्तमोहनम् ।
तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेऽधुना ॥
तत्रैव सततं भाति द्विभुजो मुरलीधरः ।
तदा सत्त्वमयो विष्णुर्भुवनं पाति निश्चितम् ॥
वैष्णवस्य महाभोगो यत्रैव परमेश्वरि ! ।
इति स्थानस्य माहात्म्यं संक्षेपेण मयोदितम् ॥
विस्तारेण न शक्नोमि जन्मान्तरशतेन च ।
बीजकोषस्य वाह्ये तु वेष्टितं तोयमण्डलम् ॥
प्रमाणं सुन्दरं तोयं यथा क्षीरोदसागरम् ।
वृत्तस्य ज्योतिषाकारं कोटिचन्द्रसमप्रभम् ॥
रम्याकाररूपेण सुशुभ्रं तोयमण्डलम् ।
गङ्गादिसरितः सर्व्वास्तत्रैव भान्ति सुन्दरि ! ॥
इन्द्रादिदेवताः सर्व्वा स्तूयमाना निरन्तरम् ।
गन्धर्व्वयक्षनागादिकुष्माण्डा भैरवास्तथा ।
नानासुखविलासेन सदा चैकाग्रचेतसः ।
विष्णुगानं प्रकुर्व्वन्ति स्तुतिभक्तिपरायणाः ॥
देवा गानं प्रकुर्व्वन्ति चतुर्व्वक्त्रेण वेधसा ।
मालवाद्याश्च षड्रागा षट्त्रिंशद्रागिणी तथा ॥
वेदगानेन भासन्तो मूर्त्तिमन्तः सदैव हि ।
मालवेनैव रागेण सामगानं सदा प्रिये ॥
मल्लारेण सदाथर्व्वं वसन्तेन तथा पुनः ।
हिन्दोलेन यजुःपाठं सदा कुर्व्वन्ति चेतसा ॥
कर्णाटेनैव ऋग्वेदं श्रीरागेण तथा शिवे ।
निर्द्दिष्टपाठमेतत्तु ह्यनिर्द्दिष्टमतः परम् ॥
तत्रैव सन्ति ते रागाः सहस्राणि च षोड़श ।
मुरारेर्मुरलीगानात् सर्व्वस्तालः प्रजायते ॥
तेन तालेन रागेण सदा गायन्ति वेधसः ।
तद्रागस्य विभागं हि कुर्व्वन्ति मुनयो जनाः ॥
वसन्ताद्याश्च ऋतवस्तिष्ठन्ति तत्र सन्ततम् ।
नानाऋतुप्रसूनेन भूषितं मुरलीधरम् ॥
तत्रैव राधिका देवी नानासुखविलासिनी ।
वदन्ती मुरलीगानं कुरु कान्त ! प्रमोहनम् ॥
येन शब्देन कामस्य उत्पत्तिर्जायते सदा ।
तद्रागस्यैव तत्तालं कुरु गानं प्रयत्नतः ॥
एवमानन्दसंयुक्ता महावेशविलासिनी ।
वामभागे सदा भाति राधिका भक्तवत्सला ॥"

(एतस्य धाम्नो नित्यादिकमाहात्म्यं लक्षणादिकञ्च ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डे २८ अध्याये विस्तरशो विवृतं यथा,—

"नित्यं स्थूलञ्च प्रच्छन्नं गोलोकाभिधमेव च ।
लक्षकोटियोजनञ्च चतुरस्रं मनोहरम् ॥
रत्नेन्द्रसारनिर्म्माणैर्गोपीनामावृतं सदा ।
सुदृश्यं वर्त्तुलाकारं यथैव चन्द्रमण्डलम् ॥
रत्नेन्द्रसारनिर्म्माणं निराधारञ्च स्वेच्छया ।
ऊर्द्ध्वञ्च नित्यं वैकुण्ठात् पञ्चाशत्कोटियोजनम् ॥
गोगोपगोपीसंयुक्तं कल्पवृक्षसमन्वितम् ।
कामधेनुभिराकीर्णं रासमण्डलमण्डितम् ॥
वृन्दावनवनाच्छन्नं विरजावेष्टितं मुने ! ।
शतशृङ्गं शतशृङ्गैः सुदीप्तं दीप्तमीप्सितम् ॥
लक्षकोटिपरिमितै राश्रमैः सुमनोहरैः ।
शतमन्दिरसंयुक्तमाश्रमं सुमनोहरम् ॥
प्राकारपरिखायुक्तं पारिजातवनान्वितम् ।
कौस्तुभेन्द्रेण मणिना निर्म्माणकलसोज्ज्वलैः ॥
हीरासारविनिर्म्माणसोपानसंघसुन्दरैः ।
मणीन्द्रसारनिर्म्माणैः कपाटदर्पणान्वितैः ॥
नानाचित्रविचित्राढ्यैराश्रमञ्च सुसंस्कृतम् ।
षोड़शद्वारसंयुक्तं सुदीप्तं रत्नदीपकैः ॥
रत्नसिंहासने रम्ये चाम्लानरत्ननिर्म्मिते ।
नानाचित्रविचित्राढ्ये वसन्तमीश्वरं वरम् ॥")

गोलोकः, पुं, (लोक्यतेऽसौ इति लोकः गोभिस्तेजोभिरुपलक्षितो लोकः । ब्रह्मस्वरूपज्योतिर्म्मयलोक इत्यर्थः ।) श्रीकृष्णस्य नित्यधाम । यथा, ब्रह्मवैवर्त्तपुराणे ॥

"निराधारश्च वैकुण्ठो ब्रह्माण्डानां परो वरः ।
तत्परश्चापि गोलोकः पञ्चाशत्कोटियोजनात् ॥
ऊर्द्ध्वे निराश्रयश्चापि रत्नसारविनिर्म्मितः ।
सप्तद्वारः सप्तसारः परिखासप्तसंयुतः ॥
लक्षप्राकारयुक्तश्च नद्या विरजया युतः ।
वेष्टितो रत्नशैलेन शतशृङ्गेण चारुणा ॥
योजनायुतमानश्च यस्यैकं शृङ्गमुज्ज्वलम् ।
शतकोटीयोजनश्च शैल उच्छ्रित एव च ॥
दैर्घ्यं तस्य शतगुणं प्रस्थे च लक्षयोजनम् ।
योजनायुतविस्तीर्णस्तत्रैव रासमण्डलः ॥
अमूल्यरत्ननिर्म्माणो वर्त्तुलश्चन्द्रबिम्बवत् ।
पारिजातवनेनैव पुष्पितेन च वेष्टितः ॥
कल्पवृक्षसहस्रेण पुष्पोद्यानशतेन च ।
नानाविधैः पुष्पवृक्षैः पुष्पितेन च चारुणा ॥
त्रिकोटिरत्नभवनैर्गोपीलक्षैश्च रक्षितः ।
रत्नप्रदीपयुक्तश्च रत्नतल्पसमन्वितः ॥
नानाभोगसमायुक्तो मधुवापीशतैर्वृतः ।
पीयूषवापीयुक्तश्च कामभोगसमन्वितः ॥
गोलोकस्येदृक्संस्थानं वर्णनं वा विशारदः ।
न कोऽपि वेद विद्वान् वा वेद विद्वान् व्रजेश्वरः ॥"

गोलोमिका, स्त्री, (गवां लोमेव लोमानः सन्त्यस्याः इति ठन् टाप् च । यद्वा गोलोमी स्वार्थे कै पूर्व्वह्रस्वः । इत्येके ।) क्षुद्रक्षुपविशेषः । गोधूमा इति पाथरी इति च भाषा । तत्पर्य्यायः । गोधूमी२ गोजा३ कोटुकपुष्पिका४ गोसम्भवा५ प्रस्तरिणी६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । त्रिदोषशमनत्वम् । हिमत्वम् । शूलरोगास्रदोषनाशित्वम् । ग्राहित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥

गोलोमी, स्त्री, (गोर्लोमवत् लोमाकारं पत्रमस्याः ।) श्वेतदूर्व्वा । (यवहारो यथा,—

"पुराणसर्पिर्लशुनं हिङ्गु-सिद्धार्थकं वचा ।
गोलोमी चाजलोमी च भूतकेशी जटा तथा ॥"

इत्यादिषु इति सुश्रुते उत्तरतन्त्रे षष्टितमेऽध्याये ॥) वचा । भूतकेशः । इति मेदिनी ॥ (यवहारोऽस्य यथा, संज्ञास्थापनगणे ।

"हिङ्गुकैटर्य्यारिमेदा-वचा-चोरक-वयःस्था-गोलोमी-जटिला-पलङ्कषाशोकरोहिण्य इति दशेमानि संज्ञास्थापनानि भवन्ति ॥" इति चरके सूत्रस्थाने चतुर्थेऽध्याये ॥) वेश्या । इति हेमचन्द्रः ॥ गोलोमिका । इति राजनिर्घण्टः ॥

गोवत्सादी, [न्] पुं, (गोवत्सं अत्ति भक्षयति । अद् + णिनिः ।) वृकः । इति राजनिर्घण्टः ॥

गोवधः, पुं, (गोर्वधो हननम् ।) गोहत्या । स च उपपातकविशेषः । यथा, मनुः ११ अः ।

"गोवधोऽयाज्यसंयाज्यपारदार्य्यात्मविक्रयाः ॥"

तत्प्रायश्चित्तं प्रायश्चित्तशब्दे द्रष्टव्यम् ॥

गोवन्दनी, स्त्री, (गवि पृथिव्यां वन्द्यते प्रशस्यते इति कर्म्मणि ल्युट् ततो ङीप् ।) प्रियङ्गुवृक्षः । इत्यमरः ॥ पीतदण्डोत्पलः । इति रत्नमाला ॥ (प्रियङ्गु पीतदण्डोत्पलयोरस्या विशेषो ज्ञातव्यः ॥)

गोवरं, क्ली, (गोभ्यो निःसृतत्वाद् वरं श्रेष्ठं माननीयमित्यर्थः । गोषु ध्रियते । धृ + बाहुलकात् अः इत्येके ।) गोखुरक्षुण्णगोष्ठस्थशुष्कगोमयचूर्णम् । यथा,—

"गोष्ठान्तर्गोखुरक्षुण्णं शुष्कं गोमयचूर्णितम् ।
गोवरं तत् समाख्यातं वरिष्ठं रससाधने ॥"
इति भावप्रकाशः ॥

गोवर्द्धनः, पुं, (गाः वर्द्धयति कोमलतृणचर्व्वणादिदानेन इति । वृध् + णिच् + ल्युः । यद्वा गावो वर्द्धन्तेऽत्र इति । णिच् + ल्युट् अधिकरणे । पर्व्वतबोधकत्वात् पुंस्त्वम् । यद्वा गां पृथ्वीं भूमिं वा वर्द्धयति । वृध् + णिच् कर्त्तरि ल्युः ।) स्वनामख्यातश्रीवृन्दावनस्थपर्व्वतः । इति जटाधरः ॥ तस्य स्वरूपं यथा,—

"अनादिर्हरिदासोऽयं भूधरो नात्र संशयः ।"

इति पाद्मे पातालखण्डे व्यासं प्रति श्रीकृष्णवाक्यम् ॥ तस्य पूजाकालादिर्यथा,—

"प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चैव समाचरेत् ।
भूषणीयास्तथा गावः पूज्याश्च दोहवाहनाः ॥
श्रीकृष्णदासवर्य्योऽयं श्रीगोवर्द्धनभूधरः ।
शुक्लप्रतिपदि प्रातः कार्त्तिकेऽर्च्योऽत्र वैष्णवैः ॥"
"प्रातर्गोवर्द्धनं पूज्य रात्रौ जागरणं चरेत् ।"
इति क्वचित् पाठः

तस्मात्तदिदं कर्म्म गोवर्द्धनप्राधान्येन गोप्राधान्येन च ख्यातमप्येकमेव ज्ञेयम् । तत्र दिननिर्णयः । तदाह देवलः ।